ॐ

॥ नमः शिवाय ॥

दर्शन-प्रवेशिका

(कारिकावली, साङ्ख्यकारिका, तर्कसङ्ग्रहः)

प्रकाशकः

ॐ नमः शिवाय प्रकाशन

दर्शन-प्रवेशिका

सम्पादकः-	चिरञ्जीवी खतिवडा
संस्करणम् -	प्रथमम्
प्रकाशितसंख्या-	१४ प्रति
प्रकाशनदिवसः	२०७५ नवरात्रारम्भः
प्रकाशकः	ॐ नमः शिवाय प्रकाशन
	देवघट्टः, तनहूँ
टङ्कणादिकम् -	ॐ नमः शिवाय कम्प्युटर
मूल्यम्	रु. ***/-

ॐ नमः शिवाय प्रकाशन

देवघाटधाम-५, तनहूँ

ॐ

॥श्रीगणेशाय नमः॥

॥श्रीसरस्वत्यै नमः॥

श्रीमद्विश्वनाथपञ्चाननभट्टाचार्यप्रणीता

कारिकावली

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥१॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः।
द्रव्याण्यथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥

स्पर्शः सङ्ख्या परिमितिः पृथक्त्वं च ततः परम्।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥४॥

बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥६॥

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥७॥

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥८॥

परभिन्ना च या जातिः सैवाऽपरतयोच्यते।
द्रव्यत्वादिकजातिस्तु पराऽपरतयोच्यते ॥९॥

व्यापकत्वात्परापि स्याद् व्याप्यत्वादपराऽपि च।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०॥

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥११॥

अभावस्तु द्विधा संसर्गाऽन्योन्याभावभेदतः।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१२॥

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।
सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥

द्रव्यादयः पञ्च भावा अनेके समवायिनः।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१४॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः।
पारिमाण्डल्यभिन्नानां कारणत्वमुपाहृतम् ॥१५॥

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम् ॥१६॥

समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत्।
तत्राऽसन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥१८॥

येन सह पूर्वभावः कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९॥

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथाऽपि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥२०॥

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥

तृतीयं तु भवेद् व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते।
क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥२४॥

क्षितिर्जलं तथा तेजः पवनो मन एव च।
पराऽपरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥

कालखात्मदिशां सर्वगतत्वं परमं महत्।
क्षित्यादिपञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥

द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३०॥

स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥

स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥३२॥

धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश ।
सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥

सङ्ख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे सङ्ख्याद्याः पञ्चवेगश्च मानसे ॥३४॥

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३५॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।
नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥३६॥

अनित्या तु तदन्या स्यात् सैवावयवयोगिनी ।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥३७॥

योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम्।
विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः॥३८॥

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥३९॥

नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।
इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ॥४०॥

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥४१॥

इन्द्रियं नयनं वह्निस्वर्णादिर्विषयो मतः।
अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४२॥

तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४४॥

इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः।
जन्यानां जनकः कालो जगतामाश्रयो मतः ॥४५॥

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।
दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥४६॥

उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्।
आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥४७॥

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥४९॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः।
अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥५०॥

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥५१॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५२॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥५३॥

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥५४॥

क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ॥५५॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥५६॥

द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥५७॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।
महत्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥५८॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥५९॥

द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्रापि समवेतानां शब्दस्य समवायतः ॥६०॥

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥६१॥

विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥६२॥

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६३॥

आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥६४॥

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥६५॥

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।
व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥६६॥

अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥६७॥

व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते।
व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥६८॥

अथवा हेतुमन्निष्ठविरहाऽप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥६९॥

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥७०॥

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥७१॥

आद्यः साधारणस्तु स्यादसाधारणकोऽपर।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥७२॥

यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।
यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥७३॥

तथैवानुपसंहारी केवलान्वयिपक्षकः।

(पर्वतो वह्निमान् सत्त्वादिति तत्रादिमो भवेत्।

पृथ्वी नित्या गन्धवत्त्वादिति स्यादपरस्तथा।

सर्वं तुच्छं प्रमेयत्वादिति तत्रान्तिमो भवेत्।)
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥७४॥

(गोत्वादिसाध्ये हेतुर्हि यत्राऽश्वत्वादिको भवेत्)

आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥७५॥

पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः।
ह्रदो द्रव्यं धूमवत्वादत्रासिद्धिरथापरा ॥७६॥

व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्।
विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥७७॥

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥७८॥

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥७९॥

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदानां तु शक्तिधीरूपमा फलम् ॥८०॥

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥८१॥

लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।
आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥८२॥

कारणं सन्निधानं तु पदस्यासत्तिरुच्यते।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥८३॥

यत्पदेन विना यस्याननुभावकता भवेत्।
आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥८४॥

साक्षात्कारे सुखादीनां करणं मन उच्यते।
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥८५॥

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।
रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥८६॥

द्रव्यत्वस्नेहवेगाश्च मता मूर्तगुणा अमी।
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च॥८७॥

एतेऽमूर्तगुणाः सर्वो विद्वद्भिः परिकीर्तिताः।
सङ्ख्यादयो विभागान्ता उभयेषां गुणा मताः ॥८८॥

संयोगश्च विभागश्च सङ्ख्या द्वित्वादिकास्तथा।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥८९॥

अतः शेषगुणाः सर्वे मता एकैकवृत्तयः।
बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९०॥

अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः।
सङ्ख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥९१॥

गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः।
सङ्ख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥९२॥

एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः।
बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥९३॥

अतीन्द्रिया विभूनां तु ये स्युर्वैशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥९४॥

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम्।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥९५॥

स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥९६॥

स्पर्शान्तपरिमाणैकपृथक्त्वं स्नेहशब्दके।
भवेदसमवायित्वमथ वैशेषिके गुणे ॥९७॥

आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥९८॥

द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत्।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥९९॥

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरूपलम्भकम्।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥१००॥

जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।
रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥१०१॥

सहकारि रसज्ञाया नित्यतादि च पूर्ववत्।
घ्राणग्राह्यो भवेद् गन्धो घ्राणस्यैवोपकारकः ॥१०२॥

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥१०३॥

अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥१०४॥

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्।
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये ॥१०५॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते।
गणनाव्यवहारे तु हेतुःसङ्ख्याभिधीयते ॥१०६॥

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।
द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ॥१०७॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥१०८॥

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते।
परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥१०९॥

अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥११०॥

सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते।
अनित्यं द्व्यणुकादौ तु सङ्ख्याजन्यमुदाहृतम् ॥१११॥

परिमाणं घटादौ तु परिमाणजमुच्यते।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥११२॥

परिमाणं तूलिकादौ नाशस्त्वाश्रयनाशतः।
सङ्ख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ॥११३॥

अन्योऽन्याभावतो नाऽस्य चरितार्थत्वमिष्यते।
अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥११४॥

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः।
कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥११५॥

तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥११६॥

मेषयोः सन्निपातो यः स द्वितीय उदाहृतः।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः ॥११७॥

तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्तितः।
अभिघातो नोदनञ्च शब्दहेतुरिहादिमः ॥११८॥

शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥११९॥

विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥१२०॥

परत्वञ्चापरत्वञ्च द्विविधं परिकीर्तितम्।
दैशिकं कालिकञ्चापि, मूर्त एव तु दैशिकम् ॥१२१॥

परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत्।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥१२२॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये।
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥१२३॥

परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥१२४॥

अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः।
बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥१२५॥

अथाऽवशिष्टोऽप्यपरः प्रकारः परिदर्श्यते।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥१२६॥

तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥१२७॥

आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः।
भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ॥१२८॥

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥१२९॥

स संशयो मतिर्या स्यादेकत्राभावभावयोः।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥१३०॥

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥१३१॥

प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।
सन्निकर्षो गुणस्तु स्यादथस त्वनुमितौ पुनः ॥१३२॥

पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत्।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः॥१३३॥

शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा।
गुणः स्याद् भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ॥१३४॥

अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्।
तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥१३५॥

प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्।
प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥१३६॥

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा।
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥१३७॥

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत् तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१३८॥

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥१३९॥

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्।
शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते ॥१४०॥

अनुमानगतार्थत्वादिति वैशेषिकं मतम्।
तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः ॥१४१॥

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः ॥१४२॥

अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥१४३॥

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥१४४॥

सुखं तु जगतामेव काम्यं धर्मेण जायते।
अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् ॥१४५॥

निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥१४६॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत्।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥१४७॥

बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका।
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥१४८॥

द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्।
प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥१४९॥

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम्।
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ॥१५०॥

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्।
निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टसाधनताधियः ॥१५१॥

यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत्।
शरीरे प्राणसञ्चारे कारणं परिकीर्तितः ॥१५२॥

अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत्।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥१५३॥

तदेवासमवायि स्यात् पतनाख्ये तु कर्मणि।
सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥१५४॥

सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः।
परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ॥१५५॥

नैमित्तिकं वह्नियोगात् तपनीयघृतादिषु।
द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् ॥१५६॥

स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ।
तैलान्तरे तत्प्रकर्षाद् दहनस्यानुकूलता ॥१५७॥

संस्कार भेदो वेगोऽथ स्थितिस्थापक भावने।
मूर्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित् ॥१५८॥

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् ॥१५९॥

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥१६०॥

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते।
धर्माधर्मावदृष्टं स्याद् धर्मः स्वर्गादिसाधनम् ॥१६१॥

गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः।
कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥१६२॥

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥१६३॥

इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः।
शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ॥१६४॥

कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥१६५॥

वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥१६६॥

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥१६७॥

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात्।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥१६८॥

॥ इति श्रीमद्विश्वनाथपञ्चाननभट्टाचार्यकृता कारिकावली समाप्ता ॥

ॐ

॥श्रीगणेशाय नमः॥

॥श्रीसरस्वत्यै नमः॥

श्रीमदीश्वरकृष्णप्रणीता

साङ्ख्यकारिका

दुःखत्रयाऽभिघाताज्जिज्ञासा तदभिघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात् ॥१॥

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयाऽतिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥२॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥३॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥

प्रतिविषयाऽध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ॥५॥

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्।
तस्मादपि चाऽसिद्धं परोक्षमाप्ताऽऽगमात्सिद्धम् ॥६॥

अतिदूरात्सामीप्यादिन्द्रियाघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ॥७॥

सौक्ष्म्यात्तदनुपलब्धिर्नाऽभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥८॥

असदकारणादुपादानग्रहणात् सर्वसम्भवाऽभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥९॥

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥१०॥

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥११॥

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाऽऽश्रयजननमिथुनवृत्तयश्च गुणाः ॥१२॥

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चाऽर्थतो वृत्तिः ॥१३॥

अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाऽभावात् ।
कारणागुणाऽऽत्मकत्त्वात् कार्यस्याऽव्यक्तमपि सिद्धम् ॥१४॥

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥१५॥

कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ॥१६॥

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।

पुरुषोऽस्ति भोक्तृभावात् कैवल्याऽर्थं प्रवृत्तेश्च ॥१७॥

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥१८॥

तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥१९॥

तस्मात्तत्संयोगादचेतनं चेनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥२०॥

पुरुषस्य दर्शनार्थं कैवल्याऽर्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥२१॥

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥२२॥

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्मद्विपर्यस्तम् ॥२३॥

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ।
एकादशश्च गणस्तन्मात्रपञ्चकश्चैव ॥२४॥

सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥२५॥

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥२६॥

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥२७॥

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दाश्च पञ्चानाम् ॥२८॥

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥३०॥

स्वां स्वां प्रतिपद्यन्ते परस्पराऽऽकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥३१॥

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यं च तस्य दशधाऽहार्यं धार्यं प्रकाश्यञ्च ॥३२॥

अन्तः करणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥३३॥

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि ॥३४॥

साऽन्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥३५॥

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।

कृत्स्नं पुरुषस्याऽर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥३६॥

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि पुनः प्रधानपुरुषाऽन्तरं सूक्ष्मम् ॥३७॥

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥३८॥

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते ॥३९॥

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरूपभोगं भावैरधिवासितं लिङ्गम् ॥४०॥

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा च्छाया।
तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥४१॥

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥४२॥

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः।
दृष्टाः करणाऽऽश्रयिणः कार्याऽऽश्रयिणश्च कललाद्याः ॥४३॥

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण।
ज्ञानेन चाऽपवर्गो विपर्ययादिष्यते बन्धः ॥४४॥

वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात्।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥४५॥

एष प्रत्यसर्गो विपर्ययाऽशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत् ॥४६॥

पञ्च विपर्ययभेदा भवन्त्यशक्तिस्तु करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥४७॥

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥४८॥

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशवधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥४९॥

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमताः ॥५०॥

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥५१॥

न विना भावैर्लिङ्गं, न विना लिङ्गैर्न भावनिर्वृतिः।
लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः ॥५२॥

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥५३॥

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिः स्तम्बपर्यन्तः ॥५४॥

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतन पुरुषः।

लिङ्गस्याऽविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥५५॥

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥५६॥

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥५७॥

औसक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥५८॥

रङ्गस्य दर्शयित्वा निवर्त्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्त्तते प्रकृतिः ॥५९॥

नानाविधैरूपायैरूपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्याऽर्थमपार्थकं चरति ॥६०॥

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृतिः ॥६२॥

रूपैः सप्तभिरेव तु बध्नात्मात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥६३॥

एवं तत्त्वाऽभ्यासान्नाऽस्मि न मे नाऽहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥६४॥

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥६५॥

दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥६६॥

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः ॥६७॥

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥६९॥

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥७०॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१॥

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥७२॥

॥ इति श्रीमदीश्वरकृष्णकृता साङ्ख्यकारिका समाप्ता ॥

ॐ

॥श्रीगणेशाय नमः॥

॥श्रीसरस्वत्यै नमः॥

श्रीमदन्नम्भट्टविरचितः

तर्कसंग्रहः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥

❂द्रव्य–गुण–कर्म–सामान्य–विशेष–समवाय–अभावाः सप्त पदार्थाः। ❂पृथिव्यप्तेजो–वाय्वाकाश–काल–दिगात्म–मनांसि नवैव।❂रूप–रस–गन्ध–स्पर्श–संख्या–परिमाण–पृथक्त्व–संयोग– विभाग– परत्वा – परत्व – गुरुत्व– द्रवत्व – स्नेह – शब्द – बुद्धि – सुख – दुःखे – च्छा – द्वेष–प्रयत्न– धर्मा॒– धर्म–संस्काराश्चतुर्विंशतिगुणाः। ❂उत्क्षेपणाऽ–पक्षेपणाऽऽ–कुञ्चन–प्रसारण–गमनानि पञ्च कर्माणि। ❂परमपरञ्चेति द्विविधं सामान्यम्। ❂नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव। ❂समवायस्त्वेक एव। ❂अभावश्चतुर्विधः– प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योऽन्याभावश्चेति।

१. द्रव्यलक्षणप्रकरणम्

❂तत्र गन्धवती पृथिवी। सा द्विविधा– नित्या अनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा– शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाऽग्रवर्ति। विषयो मृत्पाषाणादिः। ❂शीतस्पर्शवत्य आपः। ता द्विविधाः। नित्या अनित्याश्च। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः–शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाऽग्रवर्ति। विषयः सरित्समुद्रादिः। ❂उष्णस्पर्शवत्तेजः। तच्च द्विविधं

नित्यमनित्यञ्च। नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। पुनस्त्रिविधं – शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधः– भौम–दिव्यौ–दर्या–करजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि। ❂रूपरहितः स्पर्शवान्वायुः। स द्विविधो नित्योऽनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। सः पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्, सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीराऽन्तःसञ्चारी वायुः प्राणः, स चैकोऽपि उपाधिभेदात् प्राणाऽपानादिसंज्ञां लभते। ❂शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च। ❂अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च। ❂प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका नित्या विभ्वी च। ❂ज्ञानाऽधिकरणमात्मा। स द्विविधः परमात्मा जीवात्मा चेति। तत्रेश्वरः सर्वज्ञः, परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च। ❂सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।

२.गुणलक्षणप्रकरणम्।

❂चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल–नील–पीत–रक्त–हरित–कपिश–चित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्तिः। तत्र पृथिव्यां सप्तविधम्, अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि। ❂रसनाग्राह्यो गुणो रसः। स च मधुराऽ–म्ल–लवण–कटु–कषाय–तिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव। ❂घ्राणग्राह्यो गुणो गन्धः। स च द्विविधः– सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः। ❂त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः– शीतो–ष्णाऽ–नुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाऽशीतः

पृथिवीवाय्योः। ❂रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यञ्च। अन्यत्राऽपाकजं नित्यमनित्यञ्च। नित्यगतनित्यम्। अनित्यगतमनित्यम्। ❂एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यञ्च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव। ❂मानव्यवहारासाधारणं कारणं परिमाणम्, नवद्रव्यवृत्तिः। तच्चतुर्विधम्– अणु, महत्, दीर्घं, ह्रश्वञ्चेति। ❂पृथग्व्यवहाराऽसाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्तिः। ❂संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः। ❂संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः। ❂पराऽपरव्यवहारा–साधारणकारणे परत्वाऽपरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे– दिक्कृते कालकृते च। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्। ❂आद्यपतनाऽसमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्तिः। ❂आद्यस्यन्दना–समवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्तिः। तद् द्विविधं– सासिद्धिकं नैमित्तिकञ्च। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं, तेजसि सुवर्णादौ। ❂चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः। ❂श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधो– ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः। ❂सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा–स्मृतिरनुभवश्च। ❂संस्कारमात्रजन्यं ज्ञानं स्मृतिः। ❂तद्भिन्नं ज्ञानमनुभवः। स द्विविधः– यथार्थोऽयथार्थश्च। ❂तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा–रजते 'इदं रजतम्' इति ज्ञानम्। सैव प्रमेत्युच्यते। ❂तदभाववति तत्प्रकारकोऽनुवभोऽयथार्थः। यथा–शुक्तौ 'इदं रजतम्' इति ज्ञानम्।

सैवाऽप्रमेत्युच्यते। ❂यथार्थाऽनुभवश्चतुर्विधः–प्रत्यक्षाऽ–नुमित्यु–पमिति–शाब्दभेदात्। ❂तत्करणमपि चतुर्विधं– प्रत्यक्षाऽ–नुमानो–पमान–शब्दभेदात्। ❂असाधारणं कारणं करणम्। ❂कार्यनियतपूर्ववृत्तिः कारणम्। ❂कार्यं प्रागभावप्रतियोगी। ❂कारणं त्रिविधं–समवाय्यसमवायिनिमित्तभेदात्। ❂यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा– तन्तवः पटस्य, पटश्च स्वगतरूपादेः। ❂कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा– तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य। ❂तदुभयभिन्नं कारणं निमित्तकारणम्। यथा– तुरीवेमादिकं पटस्य। ❂तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

प्रत्यक्षप्रकरणम्

❂तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। ❂इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। (ज्ञानाऽकरणकं ज्ञानं प्रत्यक्षम्) तद् द्विविधं– निर्विकल्पकं सविकल्पकञ्चेति।❂तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चित्। ❂सप्रकारकं ज्ञानं सविकल्पकम्। यथा– डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयमिति। ❂प्रत्यक्षज्ञानहेतुरिन्द्रियाऽसन्निकर्षः षड्विधः– संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। ❂चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः। ❂घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात्। ❂रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुः संयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात्। ❂श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्। शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात्। ❂शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते

शब्दे शब्दत्वस्य समवायात्। ❂अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। 'घटाऽभाववद् भूतलम्' इत्यत्र चक्षुःसंयुक्ते भूतले घटाऽभावस्य विशेषणत्वात्। ❂एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं, तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।

अथ अनुमानप्रकरणम्।

❂अनुमितिकरणमनुमानम्।❂परामर्शजन्यं ज्ञानमनुमितिः। ❂व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा – 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान्, इति ज्ञानमनुमितिः। ❂'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति साहचर्यनियमो व्याप्तिः। ❂व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता। ❂अनुमानं द्विविधं– स्वार्थं परार्थं च। ❂तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयोदर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति–'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं 'वह्निव्याप्य धूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमान्, इति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्। ❂यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते, तत्परार्थानुमानम्। यथा– पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायम्, तस्मात्तथा इति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते। ❂प्रतिज्ञा–हेतू–दाहरणो–पनय–निगमनानि पञ्चावयवाः। (१) पर्वतो वह्निमान्, इति प्रतिज्ञा। (२) धूमवत्वादिति हेतुः। (३) यो यो धूमवान् स स वह्निमानित्युदाहरणम्। (४) तथा चायमित्युपनयः। (५) तस्मात्तथेति निगमनम्। ❂स्वार्थानुमिति–परार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्मात् लिङ्गपरामर्शोऽनुमानम्। ❂लिङ्गं त्रिविधम्–अन्वयवेतिरेकि,

केवलान्वयि, केवलव्यतिरेकि चेति। ❂अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयवेतिरेकि। यथा– वह्नौ साध्ये धूमवत्वम्। 'यत्र धूमस्तत्राग्निर्यथा महानसम्' इत्वन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रदः इति व्यतिरेकव्याप्तिः। ❂अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा– घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। ❂व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा – 'पृथिवीतरेभ्यो भिद्यते गन्धवत्वात्, यदितरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम्। न चेयं तथा। तस्मान्न तथेति।' अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति। पृथिवीमात्रस्य पक्षत्वात्। ❂सन्दिग्धसाध्यवान् पक्षः। यथा– धूमवत्वे हेतौ पर्वतः। ❂निश्चितसाध्यवान् सपक्षः। यथा– तत्रैव महानसम्। ❂निश्चितसाध्याभाववान् विपक्षः। यथा– तत्रैव महाह्रदः। ❂सव्यभिचार–विरुद्ध–सत्प्रतिपक्षा–सिद्ध–बाधिताः पञ्च हेत्वाभासाः। ❂सव्यभिचारोऽनैकान्तिकः। स त्रिविधः – साधारणा-साधारणा-नुपसंहारिभेदात्।❂तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा– पर्वतो वह्निमान् प्रमेयत्वादिति। अत्र प्रमेयत्वस्य बह्न्यभाववति ह्रदे विद्यमानत्वात्।❂सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा– शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्तिः।❂अन्वयव्यतिरिक्तदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि प्रमेयत्वाद् दृष्टान्तो नास्ति। ❂साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा– शब्दो नित्यः कृतकत्वादिति। अत्र कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।❂यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दवत्।

शब्दोऽनित्यः कार्यत्वाद् घटवत्। ❂असिद्धस्त्रिविधः– आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति। ❂आश्रयासिद्धो यथा– गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव। ❂स्वरूपासिद्धो यथा– शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्। ❂सोपाधिको हेतुर्व्याप्यत्वाऽसिद्धः। साध्यव्यापकत्वे सति साधनाव्याप्यकत्वमुपाधिः। साध्यसमानाधिकरणा–त्यन्ताभावा-प्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभाव–प्रतियोगित्वं साधनाव्यापकत्वम्। यथा – पर्वतो धूमवान् वह्निमत्वादित्यत्रा-ऽर्द्रेन्धनसंयोग उपाधिः। तथा– यत्र धूमस्तत्रार्द्रेन्धनसंयोगः इति साध्यव्यापकत्वम्। यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धम्।❂यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः, स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितम्।

अथोपमानप्रकरणम्

❂उपमितिकरणमुपमानम्। संज्ञा–संज्ञिसम्बन्धत्वज्ञानमुपमितिः। तत्करणं सादृश्यम्। तथा हि– कश्चिद्गवयपदाऽर्थमजान्कुतश्चिदारण्यकपुरुषात् 'गोसदृशो गवय' इति श्रुत्वा वनं गतो 'गोसदृशो गवय' इति वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरमसौ 'अयं गवयशब्दपदवाच्य' इत्युपमितिरुत्पद्यते।

अथ शब्दखण्डः

❂आप्तवाक्यं शब्दः। आप्तस्तु यथाऽर्थवक्ता। वाक्यं पदसमूहः। यथा– गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः। ❂आकांक्षा योग्यता सन्निधिश्च वाक्याऽर्थज्ञाने हेतुः। पदस्य

पदान्तरव्यतिरेकप्रयुक्ताऽन्वयाऽननुभावकत्वमाकांक्षा। अर्थाऽबाधो योग्यता। पदानामविलम्बेनोच्चारण सन्निधिः। तथा चाकांक्षारहितं वाक्यमप्रमाणम्। यथा–गौरश्वः पुरुषो हस्तीति न प्रमाणम्। आकांक्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणं, योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं, सान्निध्याऽभावात्। ❂वाक्यं द्विविधं– वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। ❂वाक्याऽर्थज्ञानं शब्दज्ञानम्। तत्करणं तु शब्दः।

अथाऽवशिष्टगुणनिरूपणम्

❂अयथार्थानुभवस्त्रिविधः– संशय-विपर्यय-तर्कभेदात्। ❂एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्याऽवगाहि ज्ञानं संशयः। यथा– स्थाणुर्वा पुरुषो वेति। ❂मिथ्याज्ञानं विपर्ययः। यथ– शुक्तौ 'रजतम्' इति। ❂व्याप्यारोपेण व्याप्यारोपकस्तर्कः। यथा–'यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्' इति। स्मृतिरपि द्विविधा– यथार्था अयथार्था चेति। प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था। ❂सर्वेषामनुकूलवेदनीयं सुखम्। ❂(सर्वेषाम्) प्रतिकूलवेदनीयं दुःखम्। ❂इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः। ❂विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्यस्त्वधर्मः। ❂बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य,अनित्या जीवस्य। ❂संस्कारस्त्रिविधो–वेगो, भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादि चतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थाऽऽपादकः स्थितिस्थापकः। कटादिपृथिवीवृत्तिः।

३.कर्मलक्षणम्

❂चलनात्मकं कर्म। ऊर्ध्ववदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

४.सामान्यलक्षणम्

❂नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। तद् द्विविधं–परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।

५.विशेषलक्षणम्

❂नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।

६.समवायलक्षणम्

❂नित्यसंबन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते। तावयुतसिद्धौ यथा अवयवावयविनौ गुणगुणिनौ, क्रिया–क्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति।

७.अभावलक्षणम्

❂अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। ❂सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य। ❂त्रैकालिकसंसार्गावच्छिन्न-प्रतियोगिताकोऽत्यन्ताभावः। यथा– भूतले घटो नास्ति। ❂तादात्म्यसंबन्धावच्छिन्न–प्रतियोगिताकोऽन्योन्याभावः। यथा –घटः पटो नेति। ❂सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम्।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः॥

॥ इति श्रीमदन्नम्भट्टविरचितस्तर्कसङ्ग्रहः समाप्तः ॥

यस प्रकाशनका महत्त्वपूर्ण प्रकाशनहरू

- मनुस्मृतिः (शास्त्रि-द्वितीयवर्षस्य)
- शाङ्करवेदान्तः (शास्त्रिप्रथमवर्षस्य)
- न्यायसिद्धान्तमुक्तावली (उत्तरमध्यमा)
- कथासङ्ग्रह (शास्त्रिप्रथमवर्षस्य)
- ब्रह्मसूत्रम् मूलमात्रम् (शास्त्रि-द्वितीयवर्षस्य)
- भाषाविज्ञान (शास्त्रिप्रथमवर्षस्य)
- लघुज्योतिषम् (नवमकक्षायाः)
- अलङ्कारछन्दांसि (दशमकक्षायाः)
- रघुवंश-द्वितीयसर्गः (दशमकक्षायाः)
- तर्कसंग्रहः (मूलमात्रम्)
- शांकरवेदान्तः (आचार्यप्रथमवर्षस्य)
- शांकरवेदान्तः (शास्त्रितृतीयवर्षस्य)
- काव्यदीपिका (शास्त्रि-द्वितीयवर्षस्य)
- निबन्धसङ्ग्रहः (शास्त्रि-द्वितीयवर्षस्य)
- सिद्धान्तकौमुदीस्थधातुपाठः (कर्तृ-कर्म/भाव-णिच्-सन्-यङ्)
- प्रतिमानाटकम् (उत्तरमध्यमा-प्रथमखण्डस्य)
- अनुवादचन्द्रिका (पुस्तकद्वयात्मिका, सोमनाथशर्मकृता)
- दर्शनप्रवेशिका (कारिकावली, साङ्ख्यकारिका, तर्कसङ्ग्रहः)

ॐ नमः शिवाय प्रकाशनम्

देवघाटधाम, तनहूँ

+977-9849165205

ckachal@gmail.com